# Shri Ramasahasranama Stotram rakArAkSharapUrvakam

# रकाराक्षरपूर्वकं श्रीरामसहस्रनामस्तोत्रम्

## Document Information

Text title : rakArAtmaka shrIrAmasahasranAmastotram

File name : rakArAtmakarAmasahasranAmastotram.itx

Category : sahasranAma

Location : doc_raama

Transliterated by : DPD, help from Alex

Proofread by : DPD, PSA Easwaran, Ravin Bhalekar

Source : brahmayAmale sRiShTiprashaMsAyAM

Latest update : May 21, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# रकाराक्षरपूर्वकं श्रीरामसहस्रनामस्तोत्रम्

ब्रह्मयामले सृष्टिप्रशंसायाम् ।
श्रीगणेशाय नमः ।
श्रीदेव्युवाच ।
ॐ देवदेव महादेव भक्तानुग्रह कारक ।
त्वतः श्रुतं मया पूर्वं मन्त्राणि शतकोटयः ॥ १॥

तन्त्राणि तन्त्रजालानि सरहस्यानि यानि च ।
तानि तानि महासिद्धिः कल्पितानि शुभानि च ॥ २॥

गुटिका पादुका सिद्धिः परकाय प्रवेशनम् ।
वाचासिद्धिश्चार्थसिद्दि च तथा सिद्धिर्मनोमयी ॥ ३॥

ज्ञान विज्ञान कर्माणि नाना सिद्धि कराणि च ।
लक्ष्मीकुतूहला सिद्धि वाञ्छासिद्धिश्चखेचरी ॥ ४॥

केनेदं सर्वमाप्नोति देवमे वद तत्त्वतः ।
श्रीशिव उवाच ।
लक्षवार सहस्राणि वारितासि च त्वं प्रिये ॥ ५॥

स्त्री स्वभावान्महादेवि पुनस्त्वं परिपृच्छति ।
श्रीदेव्युवाच ।
प्राणनाथ शिव शम्भो करुणानिधिशङ्कर ॥ ६॥

श्रीरामतत्त्वजिज्ञासा जायते परमेश्वर ।
रहस्यं रामचन्द्रस्य रकाराक्षरपूर्वकम् ॥ ७॥

रामसाहस्रकं ब्रूहि यद्यहं तव वल्लभा ।
नारी वा पुरुषो वाऽपि स्मृत्वा ब्रह्मत्वमाप्नुयात् ॥ ८॥

तद्रहस्यं समासेन वदस्व करुणानिधे ।
श्रीशिव उवाच -

महागुह्यं महागोप्यं महामङ्गलदायकम् ॥ ९॥

महासिद्धिकरं पुंसां महाव्याधिविनाशनम् ।
महापापहरं साक्षात् सर्वसौभाग्यवर्धनम् ॥ १०॥

राज्यं देयं शिरो देयं देयं स्त्री पुत्रकं शिवे ।
आत्मतुल्य धनं देयं न देयं रामतत्वकम् ॥ ११॥

तथापि नामसाहस्त्रं देवानामपि दुर्लभम् ।
न प्रोक्तं कस्यचित् काऽपि कस्मिन् काले महेश्वरि ॥ १२॥

तव स्नेहात् प्रवक्ष्यामि शृणुत्वं शुभगानने ।
विनियोगः -
ॐ अस्य श्रीरकारादिश्रीरामसहस्त्रनामस्तोत्रमन्त्रस्य
श्रीभगवान्नारायण ऋषिः । श्रीदेवी गायत्री छन्दः।
श्रीरामचन्द्रो देवता । श्री रां क्लीं बीजं। ह्रीं शक्तिः ।
ॐ अव्यक्त इति कीलकम् । मम धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥

ऋष्यादिन्यासः -
ॐ श्रीभगवन्नारायणऋषये नमः शिरसि ।
ॐ श्रीदेवी गायत्री छन्दसे नमः मुखे ।
ॐ श्रीरामचन्द्रदेवतायै नमः हृदि ।
ॐ रां क्लीं बीजाय नमः गुह्ये ।
ॐ ह्रीं शक्तये नमः पादयोः ।
ॐ अव्यक्त कीलकाय नमः सर्वाङ्गे ॥

करन्यासः -
ॐ रां श्रीं क्रुद्धोल्काय स्वाहा - अङ्गुष्ठाभ्यां नमः ।
ॐ रां क्लीं महोल्काय स्वाहा - तर्जनीभ्यां नमः ।
ॐ रां ह्रीं वीरोल्काय स्वाहा - मध्यामाभ्यां नमः ।
ॐ रां रीं विद्युल्काय स्वाहा - अनामिकाभ्यां नमः ।
ॐ रां क्रूं क्लीं अर्धोल्काय स्वाहा - कनिष्ठिकाभ्यां नमः ।
ॐ रां रां रां श्रीं क्लीं ह्रीं रां क्रूं क्लीं
सहस्त्रोल्काय स्वाहा-करतलकरपृष्ठाभ्यां नमः ॥

अङ्गन्यासः -
ॐ रां श्रीं क्रुद्धोल्काय स्वाहा हृदयाय नमः ।

ॐ रां क्लीं महोल्काय स्वाहा शिरसे स्वाहा ।
ॐ रां ह्रीं वीरोल्काय स्वाहा शिखायै वषट् ।
ॐ रां रीं विद्युल्काय स्वाहा - कवचाय हुम् ।
ॐ रां क्रूं क्लीं अधोल्काय स्वाहा - नेत्रत्रयाय वौषट् ।
ॐ रां रां रां श्रीं क्लीं ह्रीं रां क्रूं क्लीं सहस्रोल्काय स्वाहा-अस्त्राय फट् ॥

ध्यानम् -
नीलेन्दीवरतुल्यश्यामवदनं पीताम्बरालङ्कृतम्
मुद्रां ज्ञानमयीं दधानमपरां पद्मासने संस्थिताम् ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवम्
पश्यन्तीं मुकुटां गदादि विविधैः कल्पोज्वलाङ्गं भजे ॥ १३॥

अथ स्तोत्रम् ।
ॐ रामो रामकरो दीप्तो रक्तनेत्रो रमापतिः । (दीर्घो)
रणभूमिविहारी च रक्तपादो रुणच्छविः ॥ १४॥

रघुवीरो महावीरो धीरो वै सर्वराट् रविः ।
रङ्गनाथार्चितपदो रामो राजीवलोचनः ॥ १५॥

राजधर्मप्रियोऽरिष्टो विशिष्टो राक्षसान्तकृत् ।
रामो अनन्तमर्यादापालको राघवो हरिः ॥ १६॥

रम्भाफल कृताहारो रम्भाप्राण सुरोत्तमः ।
रमारमणसर्वेशो रघुवंश कृतालयः ॥ १७॥

रत्नरत्नानि वर्माणि दिव्यरत्नविभूषितः ।
ऋषीश्वरो महाप्राज्ञो राजत्केयूरकुण्डलः ॥ १८॥

रञ्जको भञ्जको खर्वो रक्तवस्त्रसदाप्रियः ।
रणमूर्त्तिः रणेकर्मा रणध्यानपरायणः ॥ १९॥

रणयुद्धरतो विद्वान् रणविद्यातिचातुरः ।
रिम्फतुं स्फुरिताङ्गानि राजीवो राजसप्रियः ॥ २०॥

रङ्गमूर्तिः राजभोगी राज्यभोगप्रदः पुमान् ।
रमाकर्मरतो वीरो रमासन्तुष्टचेतसः ॥ २१॥

रमाविहारी रघुराट् रमासत्यैकविग्रहः ।
रमाविग्रहधारी च रमाध्यानपरायणः ॥ २२॥

रमाऽभिचारनिरतो रमाऽऽज्ञापरिपालकः ।
रमाकर्मैकसन्तुष्टो रमारमणवत्सलः ॥ २३॥

रमाप्रमोदसहितो रमा अग्रगतो हरिः ।
रमासहायो भगवान् रावणप्राणहारकः ॥ २४॥

रमासर्वकरी साक्षी रामभद्रो रमानिधिः ।
रमाप्रियो रमेयात्मा रमाभाग्य विवर्द्धनः ॥ २५॥

रमाकान्तो रमानाथो राघवोऽरिष्टभञ्जनः ।
रमा विश्वस्य जननी राघवेन्द्रस्वरूपधृक् ॥ २६॥

रमाप्रचारी भगवान् रमासम्बोधनप्रियः ।
रमाकार्यरतो रिक्तो रमालावण्यसम्भवः ॥ २७॥

रामादानरतो श्रीशो रमापालनपालकः ।
रमारमेन्द्र रक्ताङ्गो रक्तविग्रहविग्रहः ॥ २८॥

रमादयाकरो विष्णुः आदिनारायणः कविः ।
रमाविश्वस्वरूपात्मा श्रीकृष्णः कालशासनः ॥ २९॥

रमासर्वकरीयन्त्रः रामचन्द्रमनुव्रतः ।
राघवो भाग्यवान् वीरो रणमध्ये जयप्रदः ॥ ३०॥

रमा सङ्केन संरम्भो रमापूजा सदाप्रियः ।
रमाहास्य सुहासी च रमासख्यैकसुन्दरः ॥ ३१॥

रमाविधानसम्पन्नो रमानन्दनकारकः ।
रमासर्वपरितृप्तो रमाकारणकारणः ॥ ३२॥

रमामानप्रकारी च रमाज्ञानविशारदः ।
रमाखेलनखेला च रमावेला रमापतिः ॥ ३३॥

रमासङ्कटहर्त्ता च नृसिंहो भक्तवत्सलः ।
रमाप्रतीतसहित तस्याज्ञापरिपूर्णतः ॥ ३४॥

रामचन्द्रश्चन्द्र लक्ष्मी रमाचर्चितपादयः ।
रमालोकविलासी च रमा रामस्य सर्वदा ॥ ३५॥

रमासुधर्मकर्मा च रमासर्वार्थसाधकः ।

रमाकीटपतङ्गाद्या रमा सर्वमिदं जगत् ॥ ३६॥

रमापादमहापुण्यमयो रामो धुरन्धरः ।
रमाप्रवीणो विश्वात्मा सर्वात्मा विश्वपूजितः ॥ ३७॥

रमास्थावररूपा च रघुवंशेऽतिनिर्मलः ।
रमाप्रसादसहितो रमाचञ्चलचञ्चलः ॥ ३८॥

रमाभरणभूतात्मा रमापोषणकारकः ।
रमापूर्णित पूर्णात्मा रमावाराहसंयुतः ॥ ३९॥

रमाकूर्मेणसहिता रमामत्स्यसमन्विताः ।
रमानृसिंहसहिता रमावामनसंयुता ॥ ४०॥

रमा रामेणसहिता रमाकृष्णपरायणा ।
रमा बौद्धस्वरूपा च रमा कल्किस्वरूपधृक् ॥ ४१॥

रमाविष्णुस्वरूपात्मा रमा राम सदागतिः ।
रमा मतिस्वरूपात्मा रमासंसर्गसङ्गमः ॥ ४२॥

रमाप्रधानमानज्ञो रमासर्वेश्वरो हरिः ।
रमाशरीरवासी च रमाविज्ञानदर्शकः ॥ ४३॥

रमातत्त्वोपदेष्टा च रमामन्त्रपरायणः ।
रमाभोगप्रदाता च रमादुःखविमोचकः ॥ ४४॥

रमासुरेन्द्रचर्चातु रमा मानसमानसः ।
रमातर्पणतृप्ता रमागाथाऽरुणाकृतिः ॥ ४५॥

रमागौरिमयीमूर्त्तिः रमाश्यामास्वरूपका ।
रमा पीतस्वरूपा च रघुनाथो पुरातनः ॥ ४६॥

रमाकरो रमादान्तो रमासत्त्वो रमाच्छविः ।
रमाऽधरो महावीरो रमा अव्यक्तदर्शनः ॥ ४७॥

रमातत्त्व परिज्ञानी रमाराज्यविहारकः ।
रमारेवातटे धीरो रमामन्त्रजपोत्कटः ॥ ४८॥

रमासुरेन्द्रवन्द्याश्च रघुः सर्वाङ्गसुन्दरः ।
रमा आब्रह्मसंयुक्ता राघवस्य प्रिया सतीः ॥ ४९॥

रमा यज्ञमयी मूर्तिः रामचन्द्रस्य सङ्गतिः ।
रमारूपी रामचन्द्रो परब्रह्मस्वरूपकः ॥ ५० ॥

रक्तचन्दनलिप्ताङ्गो रक्तमाल्यानुलेपनः ।
रक्तपुष्पप्रियो रामो वेदविद्याविशारदः ॥ ५१ ॥

रक्तवस्त्रविलासी च राघवो रघुपुङ्गवः ।
रमा सेवाकरो यस्य सत्यसन्धः प्रतापवान् ॥ ५२ ॥

राजाधिराजो भगवान् चतुर्धा मूर्तिधारकः ।
राजेन्द्रो भवहर्त्ता च राक्षसेन्द्रवरप्रदः ॥ ५३ ॥

राजकीर्त्तिर्लोकमूर्त्तिः रामः सत्यपराक्रमः ।
रमा यस्यार्धदेहस्था रामो घोराद्यमर्दनः ॥ ५४ ॥

राघवेन्द्रो वीरभद्रो रणकर्कशकर्कशः ।
राकिन्याद्यामहाशक्तिः सेव्यमानपदाम्बुजः ॥ ५५ ॥

रमारमिण्यासर्वेशो महाराजो महाद्युतिः ।
राज्यदो भक्तभक्तानामभक्तानां च किङ्करः ॥ ५६ ॥

रतिप्रियो रतिनाथो रागी रागविशारदः ।
रविः शनैश्चरो भद्रो ग्रहरूपी जनार्दनः ॥ ५७ ॥

रामकला रामक्लिन्नो रमाभाग्यो रमाऽङ्गदः ।
रमाराम भवो भीमो भयभीतिविनाशकृत् ॥ ५८ ॥

रमाक्रिया रमावीर्यो सर्वधर्मैकसाधकः ।
रक्तपात्रप्रियो रामो रक्तनेत्रवरः प्रभुः ॥ ५९ ॥
रक्तमांसप्रियो वीरो नारायणस्वरूपकः ।
रक्तास्थिचर्वको विद्वान् दीनानाथो दिनः प्रभुः ॥ ६० ॥
रमारक्तेश्वरो शुद्धो रामश्चैतन्यचेतसः ।
रामो अपूर्वकर्मज्ञो धर्मकर्मप्रवर्तकः ॥ ६१ ॥

रामो विश्वस्य कर्ता च रामो विश्वस्य नन्दनः ।
रामो विश्वस्य लुप्ता च रामो विश्वकुलान्तकः ॥ ६२ ॥

रामो विश्वस्य भर्त्ता च रामो राज्याधिपेश्वरः ।
रामो जगद्धितो वीरो रामः सर्वार्थदर्शकः ॥ ६३ ॥

रामो विरामो विरजो कौशल्यानन्दवर्धनः ।
रामः सुरातृप्तिकर्ता रामो मांसस्य भक्षकः ॥ ६४॥

रामः श्रीशाम्भवः साक्षात् श्रीसीता शाम्भवी परा ।
रामश्चक्रप्रचारी च रामस्त्रैलोक्यव्यापकः ॥ ६५॥

रामः सदाशिवो मूर्त्तिः कालमूर्तिर्दिगम्बरः ।
रामः कृपाकरो देवो विश्वव्यापी निरञ्जनः ॥ ६६॥

रामो निरामयो नित्यो नित्यसर्वगतोऽव्ययः ।
रामो वायुस्वरूपात्मा रामाकाश्यैकरूपकः ॥ ६७॥

रामो धरामूर्त्तिरूपो रामः कालान्तको हरिः ।
रामो विभीषणश्रीदः परब्रह्ममयोदितः ॥ ६८॥

रामो राक्षसहन्ता च राक्षसानां कुलान्तकः ।
रम्यमानपदाम्भोजः रमते सकलं जगत् ॥ ६९॥

रुक्मिणीप्रियकर्त्ता च रुक्मिणीमानसेस्थितः ।
रुक्मिणी चार्थदाता च रुक्मिणी वल्लभो हरिः ॥ ७०॥

रुक्मिणीसिद्धिदः सिद्धो सिध्यसाध्यादिवन्दितः ।
रुक्मिणीप्रियभाग्यश्च रुक्मिणीभाग्यवर्धनः ॥ ७१॥

रुक्मिणीभक्तिभक्तश्च रुक्मिणीसौख्यदर्शकः ।
रुक्मिणीश्रीस्वरूपा च रुक्मिणीप्राणनायकः ॥ ७२॥

रुक्मिणीभोगभुक्तश्च रुक्मिणीभगतर्पणः ।
रुक्मिणीदुःखहर्त्ता च रुक्मिणीदिव्यदर्शनः ॥ ७३॥

रुक्मिणीरूपरूपा च स्त्रीरूपा च पतिव्रताः ।
रुक्मिणीसङ्गसङ्गा च रामो नारायणोऽव्ययः ॥ ७४॥

रुक्मिणीराज्यदाता च रुक्मिणीवाक्यसिद्धिदः ।
रुक्मिणी कष्टहर्ता च रुक्मिणी द्वारकेश्वरी ॥ ७५॥

राधाऽऽराधितवित्तात्मा राधावन्दित सर्वदा ।
राधानामसदाऽऽनन्दः राधात्रैलोक्यमोहिनी ॥ ७६॥

राधासिद्धि सुनिष्ठा च राधाभक्तिरतो रघुः ।
राधारूपी रामचन्द्रो राधामोहनमोहनः ॥ ७७॥

राधामन्त्रस्वरूपात्मा श्रीमान्दाशरथिः प्रभुः ।
राधासुखनिधानं च रामो विश्वस्य मोहनः ॥ ७८॥

राधाप्राणतृप्तिकरो राधाकर्मप्रचारकः ।
राधासत्यव्रताधीनो रामनाम सदागतिः ॥ ७९॥

रकारः सर्वदेवानां साक्षात् कालानलः प्रभुः ।
रकारः सर्वदेवानां तेजपुञ्जः सनातनः ॥ ८०॥

रकारः सर्वभूतानां जीवरूपी जनार्दनः ।
रकारः सर्वजीवानां सर्वपापस्य दाहकः ॥ ८१॥

रकारः सर्वसौख्यानां सिद्धिदस्तु पुरातनः ।
रकारः सर्वविद्यानां वेदस्तत्त्वसनातनः ॥ ८२॥

रकारः सर्वसाध्यानां साधकोऽनन्तरूपधृक् ।
रकारः सर्वभूतानां व्याप्यव्यापकमीश्वरः ॥ ८३॥

रकारोत्पद्यते नित्यं रकारो लीयते जगत् ।
रकारो निर्विकल्पश्च शुद्धबुद्ध सदाऽव्ययः ॥ ८४॥

रकारः सर्वकामश्च परिपूर्णमनोरथः ।
रकारो जायते ब्रह्मा रकारो जायते हरिः । ॥ ८५॥

रकारो जायते शम्भुः रकारः सर्वशक्तयः ।
रकारः सर्वदुष्टानां नाशको रघुनायकः ॥ ८६॥

रकारः सर्वसिद्धीनां स्मरणात् दायको गुरुः ।
रकारो धर्मकामानां मोक्षश्चार्थैकसिद्धिकृत् ॥ ८७॥

रकारः सर्वसत्त्वानां महामोदमयः स्वराट् ।
रामहास्यकारी माया रकारो विद्यते सदा ॥ ८८॥

रामकीर्त्तिकरी माया मायारामयशस्करी ।
रामतेजकरी माया सर्वकालेषु सर्वदा ॥ ८९॥

रामराज्यकरी माया राजराजमयो हरिः ।
रामभोगकरी माया कालकाले निरन्तरम् ॥ ९०॥

रामदुर्गमहन्ता च रामसौभाग्यसुन्दरः ।

रामसर्वार्थदाता च भगवान् भवभञ्जनः ॥ ९१॥

रामनाम सदाऽऽनन्दो रामनाम सदागतिः ।
रामनाम सदातुष्टो रामनामस्वरूपकः ॥ ९२॥

रामनामपरा वेदाः रामनाम सदाशुचिः ।
रामनामपरा यज्ञाः रामनामपरो ध्वनिः ॥ ९३॥

रामनामपरं बीजं रामनामपरं जगत् ।
रामो उदारकर्मा च रामश्च सकलं जगत् ॥ ९४॥

रामो दयाकरो दीर्घो दुःखदारिद्र्यमर्दनः ।
रामनाम परं ज्ञानं विश्वं रामस्य चाश्रयम् ॥ ९५॥

रामात् परतरं नास्ति कार्यकारणगौरवम् ।
रामस्तपोनिधिर्देवो दीर्घनेत्रो द्युतिच्छदः ॥ ९६॥

रामः कोशस्य भोक्ता च राजराजो धनाधिपः ।
रामो बाणधरः श्रीमान् चापतूणीरपूरकः ॥ ९७॥

रामः पराक्रमी कामी कामदेवस्य पालकः ।
रामो हरः पार्वतीशो स्मर्यते च दिवानिशम् ॥ ९८॥

राजयोगस्य सिद्धीनां राजराजेश्वरोऽभवेत् ।
रकारादीनि नामानि शृण्वतो मम पार्वति॥ ९९॥

मनः प्रसन्नतामेति रामनामामिशङ्कयाः ।
रामः सुरेन्द्रो रुद्रश्च नारदाद्या महर्षयः ॥ १००॥

रामस्सेवकसेव्यश्च राघवो विश्वराघवः ।
रामस्वरूपी रामात्मा रामः प्राणपतिप्रियः ॥ १०१॥

रामः कृपाकरी मूर्तिः रामभद्रो जयप्रदः ।
रामनाम सदा सेव्यो रामाचार्यो मुनीश्वरः ॥ १०२॥

रामः प्रेमकृपासिन्धुः रामनाम धनप्रदः ।
रामनाम महावीर्यो पूर्णपुण्यविवर्धनः ॥ १०३॥

रङ्कतङ्कश्च कृत्यात्मा रेणुकायार्थदायकः ।
रवीन्द्रो रघुवरो राजराजो महाभुजः ॥ १०४॥

रविः ध्यानं रविः पूजा रविर्मूर्तिः सनातनः ।
रविः सर्वस्व दाता च तेजःपुञ्जमयः पुमान् ॥ १०५॥

रविः कलानिधिः साक्षात् कृष्टभ्रष्टस्तपःक्रियाः ।
रविः कैवल्यवर्ण च रविस्तीव्रोग्रवर्चसः ॥ १०६॥

रविर्नित्यगतो ध्येयो रविः सत्य प्रियंवदः ।
रविर्धर्मा रविः कर्मा रविर्गोप्ता रविर्हुतः ॥ १०७॥

रविर्दाता रविर्भोक्ता रविर्लोकपितामहः ।
रविमूर्त्तिस्तु सर्वेषां देवानामालयं परम् ॥ १०८॥

रविरूपी महाप्राज्ञो रमेशः परमार्थकः ।
ऋक्षसख्यो ऋक्षभृत्यो ऋक्षमन्त्रीकृतः प्रभुः ॥ १०९॥

ऋक्षराज्यप्रदो ऋक्षो ऋक्षाणां पालनोद्यतः ।
ऋक्षराजवधोपेतो सुग्रीवस्यार्थदो विभुः ॥ ११०॥

राजराजेश्वरो विष्णुः राजराजेश्वरी क्रिया ।
राजचक्रप्रवासी च नष्टराज्यार्थी सिद्धिकृत् ॥ १११॥

राजराजाधिराजेशो वीरः सत्यप्रतापवान् ।
राजसेवाकरो जिष्णुः इन्द्रः सर्वाऽखिलेष्टदः ॥ ११२॥

रुरूचर्मपरीधानो रौरवाद्यहरो हरिः ।
राजधानी राजकामी महाराजो मुनीश्वरः ॥ ११३॥

राजप्रियो राजभाग्यो रजोगुणगुणार्चितः ।
रघुवंशी रघुश्रेष्ठो राघवो ज्ञानविग्रहः ॥ ११४॥

रामो रमाप्रियो नित्यो मुनीनां मानसाधिपः ।
रामो नित्यनिजानन्दो रामभक्त दृढव्रतः ॥ ११५॥

राजितः सर्वसर्वाङ्गो राजतकेयूरकुण्डलः ।
राजतूणीरबाणश्च राजच्चापधरो विभुः ॥ ११६॥

राजच्छविः कृपासिन्धुः नीराजितपदाम्बुजः ।
राजासत्येश्वरो वीर्यो विराजः सर्वदुःखहा ॥ ११७॥

रिक्तभक्तप्रशस्तात्मा रिक्ताशक्त वरप्रदः ।
रिक्तप्रियो रिक्तमार्गो रिक्तार्थैकविमर्दनः ॥ ११८॥

रिक्तसेवा रिक्तवर्गो रिक्तस्वभावभावनः ।
रिक्तकर्त्ता रिक्तछेत्ता रिक्तविश्वप्रियंवदः ॥ ११९॥

रिक्तधर्मनिवासी च सर्वाशापरिपूरकः ।
रिक्तवर्मा रिक्तकर्मा रिक्तधर्मबहिष्कृतः ॥ १२०॥

रिक्तसूक्तो रिक्तविद्या धनुर्विद्याधरोहरः ।
रिक्तवेदविधानेन ऋग्वेदस्य प्रियो नलः ॥ १२१॥

रिक्तशास्त्रप्रतिज्ञा च रिक्तरिक्तोज्ज्वलः प्रभुः ।
रिक्तपूज्यो रिक्तसेव्यो नित्यरिक्त्तपस्विनः ॥ १२२॥

रामः परात्मा भगवान् सौभाग्यो भाग्यवर्धनः ।
रामः कमलपत्राक्षो रामस्तत्त्वप्रकाशनः ॥ १२३॥

रामः शुभार्थिनां नित्यो कैवल्यागमनिष्ठितः ।
रामः सुग्रीववाल्मीको रामो वाल्मीकिपूरितः ॥ १२४॥

रामो निरामयो देवो जाम्बवान् भगवान् भवः ।
राजसेवानिवासी च राजकर्ममनुव्रतः ॥ १२५॥

राजत्कटकधारी च विश्वरूपी जनार्दनः ।
रामो विद्यानिधिः कान्तो काकपक्षधरो बुधः ॥ १२६॥

राक्षसारिर्ब्रह्मबन्धुः परब्रह्मेन्द्रसत्कृतः ।
रामो इच्छाप्रचारी च भगवान् भूतभावनः ॥ १२७॥

रामात्मा परमात्मा च विश्वरूपप्रियान्वितः ।
रामो विरामो वैराग्यो महाविज्ञानभैरवः ॥ १२८॥

कुकर्महर्त्ता च रामः श्रीदः क्रियार्थकृत् ।
रामः संसारिणां साध्यः सौख्यदः शरणार्थिनाम् ॥ १२९॥

रामो धरापतीनां च नीतिरूपी सहस्रपात् ।
राक्षसोऽव्यक्तमूर्त्तीश्च भूतभव्यभवत्परः ॥ १३०॥
रीतिनीतिरतो धीमान् उग्रसेनो मतिप्रदः ।
ऋणत्रयविनिर्मुक्तः करुणामयसागरः ॥ १३१॥

रामो गणपतिर्गव्यो सिद्धिबुद्धिसमन्वितः ।

रामो भैरवमूर्तिश्च रामो विश्वस्य दर्पणः ॥ १३२॥

रामः श्रीकामभूतात्मा रामो दिङ्मण्डलावृतः ।
रामो निर्वाणवर्णश्च निर्वाणार्थप्रबोधकः ॥ १३३॥

रामः श्रीसर्वनैमित्यो नित्योनित्य ध्रुवोध्रुवः ।
रामो द्रव्यमयो गम्यो रामः पातालनायकः ॥ १३४॥

रामो ब्रह्माण्डमध्यस्थो गोब्राह्मणहिते रतः ।
रामो द्वितीयःसम्पन्नो निवासी गहनो गुहः ॥ १३५॥
रामो निष्कूटरूपात्मा निष्कूटानां भयङ्करः ।
रामो भीरुमयो गम्यो देवारिभयवर्धनः ॥ १३६॥

रमा तरङ्गरहिता रामभार्यारतिप्रिया ।
रमाकेलिकुलाचारी रमाऽऽचारी गुरोर्गुरः ॥ १३७॥

रश्मिप्रियकरो रम्यो रश्मिदीप्तिकरः पुमान् ।
रामस्सन्तुष्टविश्वात्मा रागगानशुभाननः ॥ १३८॥

रागसारो रागमूर्तिः रागी रागो विरागहा ।
रागसेवा राजनिधिः रतिदो गतिदः स्वरः ॥ १३९॥

राजिकाभोजनाशक्तो राजिकागन्धसत्कृती ।
राजिकाविजयीधीरो राजिकाशाकभोजनः ॥ १४०॥

राजिकाशत्रुहर्त्ता च राजिकानिन्दकान्तकः ।
राजिकाहोमसन्तुष्टो रामचन्द्रो दयानिधिः ॥ १४१॥

राजिकादर्शनः प्रीतो राजिकायाः लघुवृतः ।
राजिकाभञ्जको भीमो राजिकाभावसेवकः ॥ १४२॥

राजिकाव्रतदीप्ताङ्गो राजिकाभाग्यवर्धनः ।
राजिका कुलविद्या च रामचन्द्रो महेश्वरः ॥ १४३॥

राजिकास्तम्भनोत्सर्गो राजिता भक्तरक्षितः ।
राजिकामुख्यवीर्या च राजिकाशक्तिसम्पुटा ॥ १४४॥

राजिकासङ्घसङ्गाअश्च राजिकाचन्दनोद्यता ।
राजिकाविश्वविश्वा च राजिकारिर्विनाशनः ॥ १४५॥

राजिकापुष्पपुष्पा च रामचन्द्रसदाप्रियः ।

राजिकासर्ववश्या च राजिकाभीतिभञ्जनः ॥ १४६॥

राजिका सौम्यसौम्या च राजिकादुष्टखण्डनः ।
राजिका क्रूरकर्मा च राजिका उग्रविग्रहः ॥ १४७॥

राजिकापत्रपद्मा च महाराजो धुरन्धरः ।
राजिकातीव्रवेगा च राजिकावासुकीष्टदः ॥ १४८॥

राजिकामोहनो देवो देवदेवो हरीश्वरः ।
रामनामपरो मन्त्रो रामनामपरा क्रिया ॥ १४९॥

रामनामपरो यज्ञो रामनामपरं जपः ।
रामनामपरं सारं रामलक्ष्मीसमावृतः ॥ १५०॥

रामो अभयकर्त्ता च रामो अरिविनाशनः ।
रामो जले चान्तरिक्षे रामः सर्वत्रमोदकृत् ॥ १५१॥

रामश्शुभानि कर्माणि रामोऽपि अशुभनाशनः ।
रामो मनोभवो देवो मनोमय जगन्मयः ॥ १५२॥

रामो दामोदरो श्रीशो हृषीकेशो महाबलः ।
रामः माधवसर्वाग्रो श्रीदः पुण्यजनावृतः ॥ १५३॥

रामो दैत्यारिः सर्वज्ञो नीललोहितलोचनः ।
रामो महाविघ्नहरो रामः श्रीत्रिपुरान्तकः ॥ १५४॥

रामः शम्भुः ऋषीकेशो ईश्वरः कल्मषापहः ।
रामः पीतारुणाश्यामो सर्वदाऽऽनन्दवर्धनः ॥ १५५॥

रामः साक्षात् कृतध्वंसी व्योमकेशस्वरुपधृक् ।
रामः सर्वच्छविः कान्तः शान्तो विश्वस्य शासनः ॥ १५६॥

रामःशार्ङ्गी महासेनो निजानन्दो महाभुजः ।
रामो हरस्मरो भर्गो सर्वदा धर्मवर्धनः ॥ १५७॥

रामो स्वयंवीतिहोत्रो रामः साक्षाद् धनञ्जयः ।
रामः कृशानुरेता च रामः पिङ्गलपाटलः ॥ १५८॥

रामः स्वयं सुरश्रेष्ठो राम एव त्रिलोचनः ।
राम एव महावीर्यो रामो दिव्यशुचिर्वृतः ॥ १५९॥

राम एव निजं नित्यं बुद्धीन्द्रियमनोमयम् ।
राम एव महाव्यासो राम एव महाबलः ॥ १६०॥

राम एव निजं ब्रह्म राम एव महातपः ।
राम एव महाहंसो रामात्मा गोचरो नरः ॥ १६१॥

रामो नित्यनिराकारो रामो भरतरूपकः ।
रामस्त्रैलोक्यमध्यस्थो रामः सप्तवसुन्धराः ॥ १६२॥

रामः कुमाररूपात्मा रामः पाखण्डभञ्जनः ।
रामो मिथ्याविनाशी च रामः सत्यप्रवर्तकः ॥ १६३॥

रामो विश्वासवासी च सत्यवासी सरोरुहः ।
रामः सर्वगुहागम्यो भक्तानां मानसेष्टदः ॥ १६४॥

रामः प्रभाकरो ज्येष्ठो ईप्सितार्थप्रदर्शकः ।
रामस्तालाङ्कभूभारहारणो मदभञ्जनः ॥ १६५॥

रामः प्राणंऽअपानश्च रामोदानसमानकः ।
रामो नागश्च कृकलो देवदत्तो रमेश्वरः ॥ १६६॥

रामो धनञ्जयः सत्यो रामः पञ्चजनाह्वयः ।
रामः क्रूरस्य क्रूरात्मा वैरामः पुरुषप्रियः ॥ १६७॥

रामश्छलनिहन्तारो रामो दिव्यान्नदायकः ।
रामो दिव्याङ्गनाभोगी रामो ज्ञानवतांबरः ॥ १६८॥

रामो निजपरो मूर्त्तिः मानवाकृतिरीश्वरः ।
रामः श्रीतक्षको तीव्रो महासत्त्वेति चञ्चलः ॥ १६९॥

रामोद्वय सदासीता सहिष्णुर्जगदीश्वरः ।
रामो वीरमतां श्रेष्ठो सर्वधर्मेषु वन्दितः ॥ १७०॥

रामः श्रीपुरुषो द्वन्द्वो क्षेत्रज्ञो क्षात्रमुत्तमः ।
रामो अपांनिधिः सौम्यो भगवान् कुम्भसम्भवः ॥ १७१॥

रामो अशोकभूतात्मा भक्तानां शोकनाशनः ।
रामो मत्स्यस्वरूपात्मा सर्वसिद्धिप्रदो गिरः ॥ १७२॥

रामो महाक्षो वेदात्मा अनुकूलप्रदो भवः ।
रामः सर्वाङ्गमानन्दो नित्यलक्ष्मीविलासदः ॥ १७३॥

इतीदं कथितं देवि रामनामसहस्रकम् ।
गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥ १७४॥

न देयं कस्य देवेशि न वाच्यं कस्यचित् प्रिये ।
ये ये प्रयोगा तन्त्रेषु तैस्तैर्यत् साधयेत् फलम् ॥ १७५॥

तत् सर्वं सिध्यति नित्यं रामनाम्नैव कीर्त्तनात् ।
रोगार्त्तो मुच्यते रोगात् बन्धो मुच्येत बन्धनात् ॥ १७६॥

भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः ।
स्त्रीहत्या बालघाती च गौहत्या ब्रह्मशासनम् ॥ १७७॥

सर्वहत्याक्षयं यान्ति पाठमात्रेण पार्वति ।
स्तेयी गुर्वङ्गनागामी तथा विश्वासघातकी ॥ १७८॥

पाठमात्रेण देवेशि ! सर्वपापक्षयो भवेत् ।
जीवघाती प्राणहर्त्ता धर्मनष्टस्तु यो नरः ॥ १७९॥

पठनात् ब्रह्मसायुज्यं प्राप्नुयात् नात्र संशयः ।
अयोनिगामीनो मूढो ब्रह्मण्या सहसङ्गमी ॥ १८०॥

श्रीरामनामसाहस्रं पठनात् मुक्तपातकः ।
कुयोनिमैथुनाद् दुष्टोः दुष्टदुर्बुद्धिचेतसः ॥ १८१॥

एकावृत्त्या महेशानि ! सर्वपापैः प्रमुच्चते ।
इतीदं रामसाहस्रं दशवारं पठेद् यदि ॥ १८२॥

स गच्छेत् वैष्णवलोकं वायुर्नावमिवाम्भसि ।
भूतप्रेतपिशाचाश्च वेतालाः सिद्धचेटका ॥ १८३॥

कूष्माण्डा राक्षसा घोरा भैरवा ब्रह्मराक्षसा ।
श्रीरामनामग्रहणात् पलायन्ते दिशो दश ॥ १८४॥

श्रीं ह्रीं रां क्लीं नमः स्वाहा एवमष्टाक्षरो मनुः ।
जपेत् सहस्रनामान्ते मोहयेत् सकलं जगत् ॥ १८५॥

यत्र यत्र जपेत् वीरः शुचिर्भूत्त्वैकमानसः ।
तत्र तत्र जपो भूयात् नात्र कार्या विचारणा ॥ १८६॥

पूर्णिमा अमावास्यां च सङ्क्रान्तौ यदि वा ग्रहणेष्वपि ।

एकादश्यां नवम्यां वा सावधानेन साधकः ॥ १८७॥

पठेत् सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् ।
मोहनं सर्वजीवानां भूयात् रामप्रसादतः ॥ १८८॥

एकावृत्त्या लभेत् लक्ष्मीं द्विरावृत्त्या जगद्वशी ।
त्रिरावृत्त्या पठेन्नित्यं षण्मासात् स शिवो भवेत् ॥ १८९॥

चतुर्वारं पठेन्नित्यं पुत्रवान् कीर्तिमान् भवेत् ।
पञ्चवारं पठेन्नित्यं दिव्यकायो भवेन्नरः ॥ १९०॥

षड्वारं यः पठेत् नित्यं सर्वसिद्धीश्वरो भवेत् ।
सप्तवारं पठेत् स्तोत्रं वाचासिद्धिः प्रजायते ॥ १९१॥

अष्टवारं पठेद् देवि ! षडङ्गाभ्यांस योगतः ।
नववारं पठेन्नित्यं भगवान्मन्त्री निरामयम् ॥ १९२॥

दशवारं पठेन्नित्यं साक्षात् श्रीरामचन्द्रस्य
दर्शनं लभते ध्रुवम् ।
तुलस्याश्वत्थयोर्मध्ये शालिग्रामस्य सन्निधौ ॥ १९३॥

एकाहारी भूमिशायी जितक्रोधी जितेन्द्रियः ।
नित्यभक्त्याऽर्चयेद् विष्णुं स मुक्तः सर्वपातकैः ॥ १९४॥

श्रीरामं च हनूमन्तं सुग्रीवं च विभीषणम् ।
अङ्गदं जाम्बवन्तं च स्मृत्वा पापैः प्रमुच्यते ॥ १९५॥

राजद्वारे च सङ्ग्रामे नदीनदसमुद्रगे ।
दुर्भिक्षे विग्रहे घोरे श्मशाने च चतुष्पथे ॥ १९६॥

यत्र यत्र भये प्राप्ते तत्र तत्र पठेद् ध्रुवम् ।
विजयं सर्वमाप्नोति दुर्लभं सुलभं भवेत् ॥ १९७॥

सत्यं सत्यं पुनः सत्यं गोप्तव्यं पशुसन्निधौ ।
तव भक्त्या मया ख्यातं नाख्येयं यस्य कस्यचित् ॥ १९८॥

इहलोके सुखी भूत्वा परे मुक्तिर्भविष्यति ।
तत्र रूपैः विविधाकारैः सेव्यमानं परात् परम् ॥ १९९॥

विश्वावसुं चित्रकेतुं चित्रसेनाद्यलूककम् ।
श्रीहरिः ॐ हरिः रां हरिः क्लीं ह्वीं स्वाहा ॥ २००॥

॥ श्री ब्रह्मयामलेतन्त्रे सृष्टिप्रशंसायां उमामहेश्वरसंवादे रकारादि श्रीरामसहस्रनामस्तोत्रं सम्पूर्णम् ॥

रकारात्मक श्रीरामसहस्रनामस्तोत्रं

Note: Being part of the Brahmayamala Tantra, some of the names follow tantra practices. The devotion should be emphasize than literal meanings to them.

Proofread by DPD, PSA Easwaran, Ravin Bhalekar

*Shri Ramasahasranama Stotram rakArAkSharapUrvakam*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*